भेरी, स्त्री, ( बिभ्यति शत्रवोऽस्या इति । भी + क्रिन् । कृदिकारादिति पक्षे ङीप् । ) भेरी । इत्यमरटीकायां भरतः ॥

वराह उवाच ।

"भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरो जायते भूमे ! जन्मैकञ्च न संशयः ॥
तस्य वक्ष्यामि सुश्रोणि ! प्रायश्चित्तं मम प्रियम् ।
किल्बिषाद्द् येन मुच्येत भेरीताड़नमोहितः ॥
यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशीम् ।
आकाशशयनं कृत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
अपराधं न गच्छेत मम लोकाय गच्छति ॥"

इति वराहपुराणे भेरीताड़नापराधप्रायश्चित्तम् ॥

( यथा च, सुश्रुते । २ । २७६ । ६ ।

"एतेन भेर्य्यः पटहाश्च दिग्धा
नानद्यमाना विषमाशु हन्युः ॥")

भेरुण्डं, क्ली, गर्भधारणम् । भयानके, त्रि । इति शब्दरत्नावली ॥

भेरुण्डा, स्त्री, ( भेरुण्ड + टाप् । ) देवताविशेषः । यक्षिणीभेदः । इति मेदिनी । डे, ३४ ॥ सा देवता काली । यथा,—

"त्रिकोणनिलया नित्या परमामृतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥"

इति कालीकुलसर्व्वस्वे श्रीशिवपरशुरामसंवादे आद्यायाः सहस्रनामस्तोत्रम् ॥

भेलं, त्रि, ( भी + "ऋज्रेन्द्राग्रवज्रेति ।" उणा० २ । २८ । इति रन् रस्य लत्वम् । ) भीरुः । मूर्खः । इति मेदिनी । ले, ४३ ॥ चञ्चलः । इति शब्दरत्नावली ॥

भेलः, पुं, (भी + रन् लत्वम् ।) प्लवः । मुनिविशेषः । इति मेदिनी । ले, ४३ ॥ भेलकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

भेलकः, पुं, क्ली, ( भेल + स्वार्थे कन् । ) नद्यादितरणसाधनवस्तु । भेला इति भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ उडूपम् ४ उडुपम् ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥ तरीषः ९ । इति जटाधरः ॥

भेष, ऋ ञ भये । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-अक०-सेट् । ) ऋ अबिभेषत् । ञ भेषति भेषते बिभेष । इति दुर्गादासः ॥

भेषजं, क्ली, ( भिषजो वैद्यस्येदमित्यण् निपातनादेत्वम् । यद्वा, भेषं रोगं जयतीति । जि + डः । औषधम् । इत्यमरः । २ । ६ । ५० ॥ ("अस्ति भेषजो जलाषः ।" इति ऋक्संहिता । २ । ३३ । ७ । ) अथ भेषजभक्षणसमयाः ।

"भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः ।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः ॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम् ।
किञ्चित् सूर्य्योदये जाते तथा दिवसभोजने ।
सायन्तने भोजने च मुहुश्चापि तथा निशि ॥"

तत्र प्रथमः कालः ।

'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ।
लेखनार्थे च भैषज्यं प्रभाते नान्नमाहरेत् ॥'

अथ द्वितीयः कालः ।

'भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।
अरुचौ चित्रभोज्यैश्च मित्रं रुचिरमाहरेत् ॥
समानवाते विगुणे मन्देऽग्नौ वह्निदीपनम् ।
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥
व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत् ।
हिक्काक्षेपककम्पेषु पूर्ब्बमन्ते च भोजनात् ॥'

अथ तृतीयः कालः ।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि ।
ग्रासग्रासान्तरे देयं भैषज्यं साध्यभोजने ॥
प्राणे प्रदुष्टे साध्यस्य भुक्तस्यान्ते प्रदीयते ।
औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः ॥'

अथ चतुर्थः कालः ।

'मुहुर्मुहुश्च तृट्छर्द्दिहिक्काश्वासगरेषु च ।
सान्नञ्च भेषजं दद्यादिति कालचतुर्थकः ॥'

अथ पञ्चमः कालः ।

'ऊर्द्ध्वजत्रुविकारेषु लेखने बृंहणे तथा ।
पाचने शमने देयमनन्नं भेषजं निशि ॥'

इति पञ्चमः कालः ॥

निरन्नस्य भेषजस्य गुणमाह ।

'वीर्य्याधिकं भवति भेषजमन्नहीनं
हन्यात्तदामयमसंशयमाशु चैव ॥
तद्बालवृद्धयुवतीमृदुभिश्च पीतं
ग्लानिं परां नयति चाशु बलक्षयञ्च ॥'

सान्नस्य भेषजस्य गुणमाह ।

'शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति ।
एतद्धितं स्थविरबालकशाङ्गनाभ्यः
प्राग्भोजनाद्यदशितं किल तच्च तद्वत् ॥'

तद्वत् अन्नावृतवत् भेषजमिति शेषः ।

'औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम् ।
न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च ॥'

पीतमित्युपलक्षणम् । लीढ़ादि च ।

'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनः क्लमः ।
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥
क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छाशिरोरुजः ।
अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥'

अथ भेषजभक्षणविधिमाह चरकः ।

'देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च ।
आशिषश्च समादाय श्रद्धया भेषजं भजेत् ॥
रसायनमिवर्षीणां देवानामिव चामृतम् ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः सौषधिग्रामा भूमिदेवाश्च पान्तु वः ॥'

इत्याद्याशिषः ॥

'औषधं हेमरजतमृद्भाजनपरिस्थितम् ।
पिबेदात्मजनस्याग्रे प्रसन्नवदनेक्षणः ॥
प्रशान्तस्तूपविश्याथ पीत्वा पात्रमधोमुखम् ।
निःक्षिप्याचम्य सलिलं ताम्बूलाद्युपयोजयेत् ॥'

अथ भेषजानां विधानानि ।

'स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥'

तत्रादौ स्वरसविधिः ।

'आहतात्तत्क्षणाकृष्टात् द्रव्यात् क्षुण्णात् समुद्भवे ।
वस्त्रनिष्पीड़ितो यश्च स्वरसो रस उच्यते ॥'

अथ कल्कविधिः ।

'द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षिप्य गालयेद्वस्त्रे तन्मानं कर्षसम्मितम् ॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सितां गुड़ं समं दद्याद्द्रवा देयाश्चतुर्गुणाः ॥'

अथ क्वाथविधिः ।

'पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥
कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलम् ॥
षोड़शिकं षोड़शगुणम् ॥ * ॥

अथ हिमविधिः ।

'क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥

अथ फाण्टविधिः ।

'क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत् ।
मृत्पात्रे कुड़वोन्मानं ततस्तु स्रावयेत् पुटात् ॥
स स्यात् चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ।
क्षौद्रं सिता गुड़ादींस्तु कर्षमात्रान् विनिःक्षिपेत् ॥' * ॥

अथ तण्डुलजलविधिः ।

'कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत् ।
भावयित्वा जलं ग्राह्यं देयं सर्व्वत्र कर्म्मसु ॥'

अथ मन्थविधिः ।

'जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक तस्माच्च द्विगुणं पिबेत् ॥'

अथ चूर्णविधिः ।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत् स्याच्चूर्णं रजःक्षोदस्तन्मात्राकर्षसम्मिता ॥
चूर्णे गुड़ः समो देयः शर्करा द्विगुणा मता ।
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् ॥'

अथ भावनाविधिः ।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत् ।
भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः ॥'

अथ पुटपाकविधिः ।

'पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्याद्वाङ्गुष्ठमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥'

अथोष्णोदकविधिः ।

'अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।